Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीमद्भगवद्गीता

पदच्छेद, अन्वय

और

साधारणभाषाटीकासहित

सजिल्द १) एक रुपया

गीताप्रेस, गोरखपुर

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

5/26

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीपरमात्मने नमः

श्रीमद्भगवद्गीता

पदच्छेद-अन्वय

और

साधारणभाषाटीकासहित

5/26

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥

गीताप्रेस, गोरखपुर

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुद्रक तथा प्रकाशक
घनश्यामदास जालान
गीताप्रेस, गोरखपुर

सं० १९८५ से २००४ तक ५७,०००
सं० २००६ नवम संस्करण २५,०००
सं० २००९ दशम संस्करण २०,०००

कुल १,०२,०००

मूल्य ।।≈) सजिल्द १)

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीपरमात्मने नमः

श्रीगीताजीकी महिमा

वास्तवमें श्रीमद्भगवद्गीताका माहात्म्य वाणीद्वारा वर्णन करनेके लिये किसीका भी सामर्थ्य नहीं है, क्योंकि यह एक परम रहस्यमय ग्रन्थ है। इसमें संपूर्ण वेदोंका सार सार संग्रह किया गया है। इसका संस्कृत इतना सुन्दर और सरल है कि, थोड़ा अभ्यास करनेसे मनुष्य उसको सहज ही समझ सकता है, परन्तु इसका आशय इतना गम्भीर है कि, आजीवन निरन्तर अभ्यास करते रहनेपर भी उसका अन्त नहीं आता। प्रतिदिन नये नये भाव उत्पन्न होते रहते हैं, इससे यह सदा ही नवीन बना रहता है। एवं एकाग्रचित्त होकर श्रद्धा, भक्तिसहित विचार करनेसे इसके पद पदमें परम रहस्य भरा हुआ प्रत्यक्ष प्रतीत होता है। भगवान्के गुण, प्रभाव और मर्मका वर्णन जिस प्रकार इस गीताशास्त्रमें किया गया है, वैसा अन्य ग्रन्थोंमें मिलना कठिन है, क्योंकि प्रायः ग्रन्थोंमें कुछ न कुछ सांसारिक विषय मिला रहता है, परन्तु "श्रीमद्भगवद्गीता" एक ऐसा अनुपमेय शास्त्र भगवान्ने कहा है कि जिसमें एक भी शब्द सदुपदेशसे खाली नहीं है। इसीलिये श्रीवेदव्यासजीने महाभारतमें गीताजीका वर्णन करनेके उपरान्त कहा है कि—

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥

गीता सुगीता करनेयोग्य है, अर्थात् श्रीगीताजीको भली प्रकार पढ़कर अर्थ और भावसहित अन्तःकरणमें धारण कर लेना मुख्य कर्तव्य है, जो कि स्वयं श्रीपद्मनाभ विष्णु भगवान्के मुखारविन्दसे

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निकली हुई है, (फिर) अन्य शास्त्रोंके विस्तारसे क्या प्रयोजन है ? तथा स्वयं भगवान्ने भी इसका माहात्म्य अन्तमें वर्णन किया है (अ० १८ श्लो० ६८ से ७१ तक)।

इस गीताशास्त्रमें मनुष्यमात्रका अधिकार है, चाहे वह किसी भी वर्ण, आश्रममें स्थित होवे, परन्तु भगवान्में श्रद्धालु और भक्तियुक्त अवश्य होना चाहिये, क्योंकि अपने भक्तोंमें ही इसका प्रचार करनेके लिये भगवान्ने आज्ञा दी है तथा यह भी कहा है कि स्त्री, वैश्य, शूद्र और पापयोनिवाले मनुष्य भी मेरे परायण होकर परमगतिको प्राप्त होते हैं (अ० ९ श्लो० ३२) एवं अपने अपने स्वाभाविक कर्मोंद्वारा मेरी पूजा करके मनुष्य परमसिद्धिको प्राप्त होते हैं (अ० १८ श्लो० ४६)। इन सबपर विचार करनेसे यही ज्ञात होता है कि परमात्माकी प्राप्तिमें सभीका अधिकार है।

परन्तु उक्त विषयके मर्मको न समझनेके कारण बहुत-से मनुष्य जिन्होंने श्रीगीताजीका केवल नाममात्र ही सुना है, वे कह दिया करते हैं कि, गीता तो केवल संन्यासियोंके लिये ही है और वे अपने बालकोंको भी इसी भयसे श्रीगीताजीका अभ्यास नहीं कराते कि, गीताके ज्ञानसे कदाचित् लड़का घर छोड़कर संन्यासी न हो जाय, किन्तु उनको विचार करना चाहिये कि मोहके कारण अपने क्षात्र-धर्मसे विमुख होकर भिक्षाके अन्नसे निर्वाह करनेके लिये तैयार हुए अर्जुनने जिस परम रहस्यमय गीताके उपदेशसे आजीवन गृहस्थमें रहकर अपने कर्तव्यका पालन किया, उस गीताशास्त्रका यह उलटा परिणाम किस प्रकार हो सकता है।

अतएव कल्याणकी इच्छावाले मनुष्योंको उचित है कि

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोहको त्याग करके अतिशय श्रद्धा, भक्तिपूर्वक अपने बालकोंको अर्थ और भावके सहित श्रीगीताजीका अध्ययन करावें, एवं स्वयं भी इसका पठन और मनन करते हुए भगवान्‌की आज्ञानुसार साधन करनेमें तत्पर हो जायं; क्योंकि अति दुर्लभ मनुष्यके शरीरको प्राप्त होकर अपने अमूल्य समयका एक क्षण भी दुःखमूलक क्षणभंगुर भोगोंके भोगनेमें नष्ट करना उचित नहीं है।

श्रीगीताका प्रधान विषय

श्रीगीताजीमें भगवान्‌ने अपनी प्राप्तिके लिये मुख्य दो मार्ग बताये हैं—एक सांख्ययोग, दूसरा कर्मयोग। उनमें—

(१) संपूर्ण पदार्थ मृगतृष्णाके जलकी भाँति अथवा स्वप्नकी सृष्टिके सदृश मायामय होनेसे मायाके कार्यरूप संपूर्ण गुण ही गुणोंमें वर्तते हैं, ऐसे समझकर मन, इन्द्रियों और शरीरद्वारा होनेवाले संपूर्ण कर्मोंमें कर्तापनके अभिमानसे रहित होना (अ० ५ श्लो० ८, ९) तथा सर्वव्यापी सच्चिदानन्दघन परमात्माके स्वरूपमें एकीभावसे नित्य स्थित रहते हुए एक सच्चिदानन्दघन वासुदेवके सिवा अन्य किसीके भी होनेपनेका भाव न रहना, यह तो सांख्ययोगका साधन है।

(२) और सब कुछ भगवान्‌का समझकर सिद्धि, असिद्धिमें समत्वभाव रखते हुए आसक्ति और फलकी इच्छाका त्याग करके भगवत्-आज्ञानुसार केवल भगवान्‌के ही लिये सब कर्मोंका आचरण करना (अ० २ श्लो० ४८; अ० ५ श्लो० १०) तथा श्रद्धा, भक्तिपूर्वक मन, वाणी और शरीरसे सब प्रकार भगवान्‌के शरण होकर नाम, गुण और प्रभावसहित उनके स्वरूपका निरन्तर चिन्तन करना (अ० ६ श्लो० ४७), यह निष्काम कर्मयोगका साधन है।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उक्त दोनों साधनोंका परिणाम एक होनेके कारण वास्तवमें अभिन्न माने गये हैं (अ० ५ श्लो० ४, ५), परन्तु साधनकालमें अधिकारी-भेदसे दोनोंका भेद होनेके कारण दोनों मार्ग भिन्न-भिन्न बताये गये हैं। (अ० ३ श्लो० ३), इसलिये एक पुरुष दोनों मार्गोंद्वारा एक कालमें नहीं चल सकता। जैसे श्रीगङ्गाजीपर जानेके दो मार्ग होते हुए भी एक मनुष्य दोनों मार्गोंद्वारा एक कालमें नहीं जा सकता। उक्त साधनोंमें कर्मयोगका साधन संन्यास-आश्रममें नहीं बन सकता, क्योंकि संन्यास-आश्रममें कर्मोंका स्वरूपसे भी त्याग कहा है और सांख्ययोगका साधन सभी आश्रमोंमें बन सकता है।

यदि कहो कि, सांख्ययोगको भगवान्‌ने संन्यासके नामसे कहा है, इसलिये उसका संन्यास-आश्रममें ही अधिकार है, गृहस्थमें नहीं; तो यह कहना ठीक नहीं है, क्योंकि दूसरे अध्यायमें श्लो० ११ से ३० तक जो सांख्यनिष्ठाका उपदेश किया गया है, उसके अनुसार भी भगवान्‌ने जगह जगह अर्जुनको युद्ध करनेकी योग्यता दिखायी है। यदि गृहस्थमें सांख्ययोगका अधिकार ही नहीं होता तो इस प्रकार भगवान्‌का कहना कैसे बन सकता ? हां, इतनी विशेषता अवश्य है कि, सांख्यमार्गका अधिकारी देहाभिमानसे रहित होना चाहिये; क्योंकि जबतक शरीरमें अहंभाव रहता है, तबतक सांख्ययोगका साधन भली प्रकार समझमें नहीं आता, इसीसे भगवान्‌ने सांख्ययोगको कठिन बताया है (गीता अध्याय ५ श्लोक ६) और निष्काम कर्मयोग साधनमें सुगम होनेके कारण अर्जुनके प्रति जगह जगह कहा है कि, तू निरन्तर मेरा चिन्तन करता हुआ निष्काम कर्मयोगका आचरण कर।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

अर्थ—जिसकी आकृति अतिशय शान्त है, जो शेषनागकी शय्यापर शयन किये हुए है, जिसकी नाभिमें कमल है, जो देवताओं-का भी ईश्वर और संपूर्ण जगत्का आधार है, जो आकाशके सदृश सर्वत्र व्याप्त है, नीलमेघके समान जिसका वर्ण है, अतिशय सुन्दर जिसके संपूर्ण अङ्ग हैं, जो योगियोंद्वारा ध्यान करके प्राप्त किया जाता है, जो संपूर्ण लोकोंका स्वामी है, जो जन्ममरणरूप भयका नाश करनेवाला है, ऐसे श्रीलक्ष्मीपति, कमलनेत्र विष्णु भगवान्को मैं (शिरसे) प्रणाम करता हूं ।

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

अर्थ—ब्रह्मा, वरुण, इन्द्र, रुद्र और मरुद्गण दिव्य स्तोत्रोंद्वारा जिसकी स्तुति करते हैं, सामवेदके गानेवाले अङ्ग, पद, क्रम और उपनिषदोंके सहित वेदोंद्वारा जिसका गायन करते हैं, योगीजन ध्यानमें स्थित तद्गत हुए मनसे जिसका दर्शन करते हैं, देवता और असुरगण (कोई भी) जिसके अन्तको नहीं जानते, उस (परमपुरुष नारायण) देवके लिये मेरा नमस्कार है ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीपरमात्मने नमः

श्रीमद्भगवद्गीता

गीताशास्त्रमिदं पुण्यं यः पठेत्प्रयतः पुमान् ।
विष्णोः पदमवाप्नोति भयशोकादिवर्जितः ॥ १ ॥
गीताध्ययनशीलस्य प्राणायामपरस्य च ।
नैव सन्ति हि पापानि पूर्वजन्मकृतानि च ॥ २ ॥
मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ।
सकृद्गीताम्भसि स्नानं संसारमलनाशनम् ॥ ३ ॥
गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥ ४ ॥
भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम् ।
गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ॥ ५ ॥
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ ६ ॥

एकं शास्त्रं देवकीपुत्रगीत-
मेको देवो देवकीपुत्र एव ।
एको मन्त्रस्तस्य नामानि यानि
कर्माप्येकं तस्य देवस्य सेवा ॥ ७ ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

श्रीबांकेविहारी

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ॐ श्रीपरमात्मने नमः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

अथ श्रीमद्भगवद्गीता

भाषाटीकासहित

अथ प्रथमोऽध्यायः

प्रधान विषय—१ से ११ तक दोनों सेनाओंके प्रधान प्रधान शूरवीरोंकी गणना और सामर्थ्यका कथन, (१२—१९) दोनों सेनाओंकी शङ्खध्वनिका कथन, (२०—२७) अर्जुनद्वारा सेनानिरीक्षणका प्रसङ्ग, (२८—४७) मोहसे व्याप्त हुए अर्जुनके कायरता, स्नेह और शोकयुक्त वचन ।

धृतराष्ट्र उवाच

युद्धके विषयमें धृतराष्ट्रका प्रश्न ।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १ ॥

पदच्छेदः

धर्मक्षेत्रे, कुरुक्षेत्रे, समवेताः, युयुत्सवः,
मामकाः, पाण्डवाः, च, एव, किम्, अकुर्वत, संजय ॥ १ ॥

अन्वयः	शब्दार्थ	अन्वयः	शब्दार्थ
	धृतराष्ट्र बोला—		
संजय	=हे संजय	कुरुक्षेत्रे	=कुरुक्षेत्रमें
धर्मक्षेत्रे	=धर्मभूमि	समवेताः	=इकट्ठे हुए

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

युयुत्सवः	=युद्धकी इच्छावाले	एव*	
मामकाः	=मेरे	पाण्डवाः	=पाण्डुके पुत्रोंने
च	=और	किम्	=क्या
		अकुर्वत	=किया

संजय उवाच

धृतराष्ट्रकृत प्रश्नके उत्तरमें द्रोणाचार्यके पास दुर्योधनके गमन-का वर्णन।

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

दृष्ट्वा, तु, पाण्डवानीकम्, व्यूढम्, दुर्योधनः, तदा,
आचार्यम्, उपसंगम्य, राजा, वचनम्, अब्रवीत् ॥ २ ॥

इसपर संजय बोला—

तदा	=उस समय	दृष्ट्वा	=देखकर
राजा	=राजा	तु	=और
दुर्योधनः	=दुर्योधनने	आचार्यम्	=द्रोणाचार्यके
व्यूढम्	=व्यूहरचनायुक्त	उपसंगम्य	=पास जाकर (यह)
पाण्डवानीकम्	=पाण्डवोंकी सेनाको	वचनम्	=वचन
		अब्रवीत्	=कहा

पाण्डवसेनाको देखनेके लिये गुरुसे दुर्योधनकी प्रार्थना।

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

पश्य, एताम्, पाण्डुपुत्राणाम्, आचार्य, महतीम्, चमूम्,
व्यूढां, द्रुपदपुत्रेण, तव, शिष्येण, धीमता ॥ ३ ॥

* यहाँ "एव" शब्द समुच्चयार्थ है।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आचार्य	=हे आचार्य	व्यूढाम्	=व्यूहाकार खड़ी की हुई
तव	=आपके	पाण्डु-पुत्राणाम्	=पाण्डुपुत्रोंकी
धीमता	=बुद्धिमान्	एताम्	=इस
शिष्येण	=शिष्य	महतीम्	=बड़ी भारी
द्रुपदपुत्रेण	=द्रुपदपुत्र धृष्टद्युम्नद्वारा	चमूम्	=सेनाको
		पश्य	=देखिये

पाण्डवसेनाके प्रधान प्रधान महारथियों के नाम।

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥४॥

अत्र, शूराः, महेष्वासाः, भीमार्जुनसमाः, युधि, युयुधानः, विराटः, च, द्रुपदः, च, महारथः ॥४॥

अत्र	=इस (सेना) में	(सन्ति)	=हैं (जैसे)
महेष्वासाः	=बड़े बड़े धनुषोंवाले	युयुधानः	=सात्यकि
		च	=और
युधि	=युद्धमें	विराटः	=विराट
भीमार्जुन-समाः	=भीम और अर्जुनके समान	च	=तथा
		महारथः	=महारथी
शूराः	=बहुतसे शूरवीर	द्रुपदः	=राजा द्रुपद

[,,] **धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।**
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥५॥

धृष्टकेतुः, चेकितानः, काशिराजः, च, वीर्यवान्, पुरुजित्, कुन्तिभोजः, च, शैब्यः, च, नरपुङ्गवः ॥५॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च	=और	पुरुजित्	=पुरुजित्
धृष्टकेतुः	=धृष्टकेतु	कुन्तिभोजः	=कुन्तिभोज
चेकितानः	=चेकितान	च	=और
च	=तथा	नरपुङ्गवः	=मनुष्योंमें श्रेष्ठ
वीर्यवान्	=बलवान्		
काशिराजः	=काशिराज	शैब्यः	=शैब्य

[„] युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥

युधामन्युः, च, विक्रान्तः, उत्तमौजाः, च, वीर्यवान्,
सौभद्रः, द्रौपदेयाः, च, सर्वे, एव, महारथाः ॥६॥

च	=और	च	=और
विक्रान्तः	=पराक्रमी	द्रौपदेयाः	=द्रौपदीके पांचों पुत्र
युधामन्युः	=युधामन्यु		
च	=तथा		
वीर्यवान्	=बलवान्		(यह)
उत्तमौजाः	=उत्तमौजा	सर्वे	=सब
सौभद्रः	=सुभद्रापुत्र अभिमन्यु	एव	=ही
		महारथाः	=महारथी हैं

अपनी सेनाके प्रधानप्रधानशूर-वीरोंको जाननेके लिये गुरुसे दुर्योधनकी प्रार्थना

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥७॥

अस्माकम्, तु, विशिष्टाः, ये, तान्, निबोध, द्विजोत्तम,
नायकाः, मम, सैन्यस्य, संज्ञार्थम्, तान्, ब्रवीमि, ते ॥७॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्विजोत्तम	= हे ब्राह्मणश्रेष्ठ	ते	= आपके
अस्माकम्	= हमारे पक्षमें	संज्ञार्थम्	= जाननेके लिये
तु	= भी	मम	= मेरी
ये	= जो जो	सैन्यस्य	= सेनाके
विशिष्टाः	= प्रधान हैं	(ये)	= जो जो
तान्	= उनको (आप)	नायकाः	= सेनापति हैं
		तान्	= उनको
निबोध	= समझ लीजिये	ब्रवीमि	= कहता हूं

दुर्योधनद्वारा अपनी सेनाके प्रधान प्रधान महारथियों के नामोंका कथन।

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

भवान्, भीष्मः, च, कर्णः, च, कृपः, च, समितिंजयः,
अश्वत्थामा, विकर्णः, च, सौमदत्तिः, तथा, एव, च ॥ ८ ॥

एक तो स्वयम्—

भवान्	= आप	च	= तथा
च	= और	तथा	= वैसे
भीष्मः	= पितामह भीष्म	एव	= ही
च	= तथा	अश्वत्थामा	= अश्वत्थामा
कर्णः	= कर्ण	विकर्णः	= विकर्ण
च	= और	च	= और
समितिंजयः	= संग्रामविजयी	सौमदत्तिः	= सोमदत्तका पुत्र भूरिश्रवा
कृपः	= कृपाचार्य		

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दुर्योधनद्वारा अपनी सेनाके शूरवीरों की प्रशंसा ।

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

अन्ये, च, बहवः, शूराः, मदर्थे, त्यक्तजीविताः,
नानाशस्त्रप्रहरणाः, सर्वे, युद्धविशारदाः ॥ ९ ॥

तथा–

अन्ये	= और	मदर्थे	= मेरे लिये
च	= भी	त्यक्त-जीविताः	= जीवनकी आशाको त्यागनेवाले
बहवः	= बहुतसे	सर्वे	= सबके सब
शूराः	= शूरवीर	युद्ध-विशारदाः	= युद्धमें चतुर हैं
नानाशस्त्र-प्रहरणाः	= अनेकप्रकारके शस्त्र अस्त्रोंसे युक्त		

दुर्योधनका पाण्डवसेना की अपेक्षा अपनो सेनाको अजेय बतलाना ।

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥

अपर्याप्तम्, तत्, अस्माकम्, बलम्, भीष्माभिरक्षितम्,
पर्याप्तम्, तु, इदम्, एतेषाम्, बलम्, भीमाभिरक्षितम् ॥ १० ॥

और–

भीष्माभि-रक्षितम्	= भीष्मपितामह-द्वारा रक्षित	बलम्	= सेना
अस्माकम्	= हमारी	अपर्याप्तम्	= सब प्रकारसे अजेय है
तत्	= वह	तु	= और

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भीमाभि-रक्षितम्	= भीमद्वारा रक्षित	बलम्	= सेना
एतेषाम्	= इन लोगोंकी	पर्याप्तम्	= जीतनेमें सुगम है
इदम्	= यह		

भीष्मकी रक्षा-के लिये द्रोणादि शूरवीरोंके प्रति दुर्योधन की प्रेरणा ।

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥११॥

अयनेषु, च, सर्वेषु, यथाभागम्, अवस्थिताः,
भीष्मम्, एव, अभिरक्षन्तु, भवन्तः, सर्वे, एव, हि ॥११॥

च	= इसलिये	सर्वे	= सबके सब
सर्वेषु	= सब	एव	= ही
अयनेषु	= मोर्चोंपर	हि	= निःसन्देह
यथा-भागम्	= अपनी अपनी जगह	भीष्मम्	= भीष्म-पितामहकी
		एव	= ही
अवस्थिताः	= स्थित रहते हुए	अभिरक्षन्तु	= सब ओरसे रक्षा करें
भवन्तः	= आपलोग		

दुर्योधनकी प्रसन्नताके लिये भीष्मका गर्जकर शङ्ख बजाना ।

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥१२॥

तस्य, संजनयन्, हर्षम्, कुरुवृद्धः, पितामहः,
सिंहनादम्, विनद्य, उच्चैः, शङ्खम्, दध्मौ, प्रतापवान् ॥१२॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इस प्रकार द्रोणाचार्यसे कहते हुए दुर्योधनके वचनोंको सुनकर—

कुरुवृद्धः	= कौरवोंमें वृद्ध	संजनयन्	= उत्पन्न करते हुए
प्रतापवान्	= बड़े प्रतापी	उच्चैः	= उच्च स्वरसे
पितामहः	= पितामह भीष्मने	सिंहनादम्	= सिंहकी नाद-के समान
तस्य	= उस (दुर्योधन) के (हृदयमें)	विनद्य	= गर्जकर
		शङ्खम्	= शङ्ख
हर्षम्	= हर्ष	दध्मौ	= बजाया

दुर्योधनकी सेनामें नाना प्रकारके बाजोंका भयंकर शब्द होना।

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३॥

ततः, शङ्खाः, च, भेर्यः, च, पणवानकगोमुखाः,

सहसा, एव, अभ्यहन्यन्त, सः, शब्दः, तुमुलः, अभवत् ॥१३॥

ततः	= उसके उपरान्त	सहसा	= एक साथ
शङ्खाः	= शङ्ख	एव	= ही
च	= और	अभ्यहन्यन्त	= बजे
भेर्यः	= नगारे		(उनका)
च	= तथा	सः	= वह
		शब्दः	= शब्द
पणवानक-गोमुखाः	= ढोल मृदङ्ग और नृसिंहादि बाजे	तुमुलः	= बड़ा भयङ्कर
		अभवत्	= हुआ

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीकृष्ण, अर्जुन और भीमसेन-द्वारा शङ्खोंका बजाया जाना ।

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४॥

ततः, श्वेतैः, हयैः, युक्ते, महति, स्यन्दने, स्थितौ,
माधवः, पाण्डवः, च, एव, दिव्यौ, शङ्खौ, प्रदध्मतुः ॥ १४ ॥

ततः	=इसके अनन्तर	माधवः	=श्रीकृष्ण महाराज
श्वेतैः	=सफ़ेद	च	=और
हयैः	=घोड़ोंसे	पाण्डवः	=अर्जुनने
युक्ते	=युक्त	एव	=भी
महति	=उत्तम	दिव्यौ	=अलौकिक
स्यन्दने	=रथमें	शङ्खौ	=शङ्ख
स्थितौ	=बैठे हुए	प्रदध्मतुः	=बजाये

[,,] पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५॥

पाञ्चजन्यम्, हृषीकेशः, देवदत्तम्, धनंजयः,
पौण्ड्रम्, दध्मौ, महाशङ्खम्, भीमकर्मा, वृकोदरः ॥ १५ ॥

उनमें

हृषीकेशः	=श्रीकृष्ण महाराजने	देवदत्तम्	=देवदत्त नामक शङ्ख (बजाया)
पाञ्चजन्यम्	=पाञ्चजन्य नामक शङ्ख		
धनंजयः	=अर्जुनने	भीमकर्मा	=भयानक कर्मवाले

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वृकोदरः	=भीमसेनने	**महाशङ्खम्**	=महाशङ्ख
पौण्ड्रम्	=पौण्ड्र नामक	**दध्मौ**	=बजाया

युधिष्ठिर, नकुल और सहदेवद्वारा शङ्खोंका बजाया जाना।

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१६॥

अनन्तविजयम्, राजा, कुन्तीपुत्रः, युधिष्ठिरः,
नकुलः, सहदेवः, च, सुघोषमणिपुष्पकौ ॥ १६ ॥

कुन्तीपुत्रः	=कुन्तीपुत्र	**च**	=तथा
राजा	=राजा		
युधिष्ठिरः	=युधिष्ठिरने	**सहदेवः**	=सहदेवने
अनन्तविजयम्	=अनन्तविजय नामक (और)	**सुघोषमणिपुष्पकौ**	=सुघोष और मणिपुष्पक नामवाले शङ्ख (बजाये)
नकुलः	=नकुल		

पाण्डवोंकी सेनाके प्रधान प्रधान योधाओंद्वारा शङ्खोंका बजाया जाना।

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥

काश्यः, च, परमेष्वासः, शिखण्डी, च, महारथः,
धृष्टद्युम्नः, विराटः, च, सात्यकिः, च, अपराजितः ॥ १७ ॥

परमेष्वासः	=श्रेष्ठ धनुषवाला	**शिखण्डी**	=शिखण्डी
काश्यः	=काशिराज	**च**	=और
च	=और	**धृष्टद्युम्नः**	=धृष्टद्युम्न
महारथः	=महारथी	**च**	=तथा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विराटः	=राजा विराट	**अपराजितः**	=अजेय
च	=और	**सात्यकिः**	=सात्यकि

[„] **द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।**

सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥१८॥

द्रुपदः, द्रौपदेयाः, च, सर्वशः, पृथिवीपते,
सौभद्रः, च, महाबाहुः, शङ्खान्, दध्मुः, पृथक्, पृथक् ॥ १८ ॥

तथा—

द्रुपदः	=राजा द्रुपद	**सौभद्रः**	=सुभद्रापुत्र अभिमन्यु
च	=और	**सर्वशः**	=इन सबने
द्रौपदेयाः	=द्रौपदीके पांचों पुत्र	**पृथिवीपते**	=हे राजन्
		पृथक्	=अलग
च	=और	**पृथक्**	=अलग
महाबाहुः	=बड़ी भुजावाला	**शङ्खान्**	=शङ्ख
		दध्मुः	=बजाये

पाण्डवसेनाकी शङ्खध्वनिसे धृतराष्ट्रपुत्रोंके हृदयोंका विदीर्ण होना ।

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।

नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥१९॥

सः, घोषः, धार्तराष्ट्राणाम्, हृदयानि, व्यदारयत्,
नभः, च, पृथिवीम्, च, एव, तुमुलः, व्यनुनादयन् ॥ १९ ॥

च	=और	**तुमुलः**	=भयानक
सः	=उस	**घोषः**	=शब्दने

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नभः	=आकाश	धार्तराष्ट्राणाम्	=धृतराष्ट्रपुत्रोंके
च	=और	हृदयानि	=हृदय
पृथिवीम्	=पृथिवीको	व्यदारयत्	=विदीर्ण कर दिये
एव	=भी		
व्यनुनादयन्	=शब्दायमान करते हुए		

दुर्योधनकी सेनाको युद्धके लिये तैयार देखकर दोनों सेनाओंके बीचमें रथ खड़ा करनेके लिये भगवान्‌के प्रति अर्जुनकी प्रेरणा

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥२०॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥२१॥

अथ, व्यवस्थितान्, दृष्ट्वा, धार्तराष्ट्रान्, कपिध्वजः,
प्रवृत्ते, शस्त्रसंपाते, धनुः, उद्यम्य, पाण्डवः ॥ २० ॥
हृषीकेशम्, तदा, वाक्यम्, इदम्, आह, महीपते,
सेनयोः, उभयोः, मध्ये, रथम्, स्थापय, मे, अच्युत ॥ २१ ॥

महीपते	=हे राजन्	धार्तराष्ट्रान्	=धृतराष्ट्रपुत्रोंको
अथ	=उसके उपरान्त	दृष्ट्वा	=देखकर
कपिध्वजः	=कपिध्वज	तदा	=उस
पाण्डवः	=अर्जुनने	शस्त्रसंपाते प्रवृत्ते	=शस्त्र चलनेकी तैयारीके समय
व्यवस्थितान्	=खड़े हुए		

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धनुः	= धनुष	अच्युत	= हे अच्युत
उद्यम्य	= उठाकर	मे	= मेरे
हृषीकेशम्	= हृषीकेश श्रीकृष्ण महाराजसे	रथम्	= रथको
		उभयोः	= दोनों
		सेनयोः	= सेनाओंके
इदम्	= यह	मध्ये	= बीचमें
वाक्यम्	= वचन	स्थापय	= खड़ा करिये
आह	= कहा		

दुर्योधनकी सेनामें आये हुए शूरवीरोंको देखनेके लिये अर्जुनका स्वेच्छा प्रगट करना ।

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२॥

यावत्, एतान्, निरीक्षे, अहम्, योद्धुकामान्, अवस्थितान्,
कैः, मया, सह, योद्धव्यम्, अस्मिन्, रणसमुद्यमे ॥२२॥

यावत्	= जबतक	अस्मिन्	= इस
अहम्	= मैं	रणसमुद्यमे	= युद्धरूप व्यापारमें
एतान्	= इन		
अवस्थितान्	= स्थित हुए	मया	= मुझे
योद्धुकामान्	= युद्धकी कामनावालोंको	कैः	= किन किनके
		सह	= साथ
निरीक्षे	= अच्छी प्रकार देख लूं (कि)	योद्धव्यम्	= युद्ध करना योग्य है

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[„] योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥२३॥

योत्स्यमानान्, अवेक्षे, अहम्, ये, एते, अत्र, समागताः,
धार्तराष्ट्रस्य, दुर्बुद्धेः, युद्धे, प्रियचिकीर्षवः ॥२३॥

और–

दुर्बुद्धेः	=दुर्बुद्धि	अत्र	=इस सेनामें
धार्तराष्ट्रस्य	=दुर्योधनका	समागताः	=आये हैं
युद्धे	=युद्धमें	(तान्)	=उन
प्रियचिकीर्षवः	=कल्याण चाहनेवाले	योत्स्यमानान्	=युद्ध करनेवालोंको
ये	=जो जो	अहम्	=मैं
एते	=ये राजालोग	अवेक्षे	=देखूंगा

संजय उवाच

भगवान्का दोनों सेनाओंके बीचमें रथको खड़ा करना और अर्जुनके प्रति कौरवोंको देखनेके लिये आज्ञा देना ।

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥२४॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥२५॥

एवम्, उक्तः, हृषीकेशः, गुडाकेशेन, भारत,
सेनयोः, उभयोः, मध्ये, स्थापयित्वा, रथोत्तमम् ॥२४॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भीष्मद्रोणप्रमुखतः, सर्वेषाम्, च, महीक्षिताम्, उवाच, पार्थ, पश्य, एतान्, समवेतान्, कुरून्, इति ॥२५॥

संजय बोला—

भारत	=हे धृतराष्ट्र	च	=और
गुडाकेशेन	=अर्जुनद्वारा	सर्वेषाम्	=संपूर्ण
एवम्	=इस प्रकार	महीक्षिताम्	=राजाओंके सामने
उक्तः	=कहे हुए		
हृषीकेशः	=महाराज श्रीकृष्ण-चन्द्रने	रथोत्तमम्	=उत्तम रथको
		स्थापयित्वा	=खड़ा करके
		इति	=ऐसे
उभयोः	=दोनों	उवाच	=कहा कि
सेनयोः	=सेनाओंके	पार्थ	=हे पार्थ
मध्ये	=बीचमें	एतान्	=इन
भीष्मद्रोण-प्रमुखतः	=भीष्म और द्रोणाचार्यके सामने	समवेतान्	=इकट्ठे हुए
		कुरून्	=कौरवोंको
		पश्य	=देख

अर्जुनका दोनों सेनामें स्थित हुए बान्धवोंको देखना ।

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।

तत्र, अपश्यत्, स्थितान्, पार्थः, पितॄन्, अथ, पितामहान्, आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन्, तथा, श्वशुरान्, सुहृदः, च, एव, सेनयोः, उभयोः, अपि ।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ	=उसके उपरान्त	मातुलान्	=मामोंको
पार्थः	=पृथापुत्र अर्जुनने	भ्रातॄन्	=भाइयोंको
तत्र	=उन	पुत्रान्	=पुत्रोंको
उभयोः	=दोनों	पौत्रान्	=पौत्रोंको
अपि	=ही	तथा	=तथा
सेनयोः	=सेनाओंमें	सखीन्	=मित्रोंको
स्थितान्	=स्थित हुए	श्वशुरान्	=ससुरोंको
पितॄन्	=पिताके भाइयोंको	च	=और
		सुहृदः	=सुहृदोंको
पितामहान्	=पितामहोंको	एव	=भी
आचार्यान्	=आचार्योंको	अपश्यत्	=देखा

["] तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

तान्, समीक्ष्य, सः, कौन्तेयः, सर्वान्, बन्धून्, अवस्थितान् ॥
कृपया, परया, आविष्टः, विषीदन्, इदम्, अब्रवीत् ।

इस प्रकार—

तान्	=उन	सः	=वह
अवस्थितान्	=खड़े हुए	परया	=अत्यन्त
सर्वान्	=संपूर्ण	कृपया	=करुणासे
बन्धून्	=बन्धुओंको	आविष्टः	=युक्त हुआ
समीक्ष्य	=देखकर	कौन्तेयः	=कुन्तीपुत्र अर्जुन

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषीदन्	=शोक करता हुआ	अब्रवीत्	=बोला
इदम्	=यह		

अर्जुन उवाच

स्वजनोंको युद्धके लिये तैयार देखकर अर्जुनके शरीर और मनमें कायरता और शोकजनित चिह्नोंके होनेका कथन ।

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥२८॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥२९॥

दृष्ट्वा, इमम्, स्वजनम्, कृष्ण, युयुत्सुम्, समुपस्थितम् ॥२८॥
सीदन्ति, मम, गात्राणि, मुखम्, च, परिशुष्यति,
वेपथुः, च, शरीरे, मे, रोमहर्षः, च, जायते ॥२९॥

कृष्ण	=हे कृष्ण	सीदन्ति	=शिथिल हुए जाते हैं
इमम्	=इस	च	=और
युयुत्सुम्	=युद्धकी इच्छावाले	मुखम्	=मुख (भी)
समुपस्थितम्	=खड़े हुए	परिशुष्यति	=सूखा जाता है
स्वजनम्	=स्वजन-समुदायको	च	=और
दृष्ट्वा	=देखकर	मे	=मेरे
मम	=मेरे	शरीरे	=शरीरमें
गात्राणि	=अङ्ग	वेपथुः	=कम्प
		च	=तथा
		रोमहर्षः	=रोमाञ्च
		जायते	=होता है

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[„] गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥३०॥

गाण्डीवम्, स्रंसते, हस्तात्, त्वक्, च, एव, परिदह्यते,
न, च, शक्नोमि, अवस्थातुम्, भ्रमति, इव, च, मे, मनः ॥३०॥

तथा—

हस्तात्	=हाथसे	मे	=मेरा
गाण्डीवम्	=गाण्डीव धनुष	मनः	=मन
स्रंसते	=गिरता है	भ्रमति इव	=भ्रमित सा हो रहा है
च	=और	(अतः)	=इसलिये (मैं)
त्वक्	=त्वचा	अवस्थातुम्	=खड़ा रहनेको
एव	=भी	च	=भी
परिदह्यते	=बहुत जलती है	न शक्नोमि	=समर्थ नहीं हूं
च	=तथा		

अर्जुनका विपरीत लक्षणों-को देखकर युद्धमें स्वजनोंको मारनेसे हानि समझना ।

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥३१॥

निमित्तानि, च, पश्यामि, विपरीतानि, केशव,
न, च, श्रेयः, अनुपश्यामि, हत्वा, स्वजनम्, आहवे ॥३१॥

और—

केशव	=हे केशव	च	=भी
निमित्तानि	=लक्षणोंको	विपरीतानि	=विपरीत (ही)

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पश्यामि	=देखता हूं (तथा)	श्रेयः	=कल्याण
आहवे	=युद्धमें	च	=भी
स्वजनम्	=अपने कुलको	न	=नहीं
हत्वा	=मारकर	अनुपश्यामि	=देखता

स्वजनवधसे मिलनेवालेराज्य-भोग और सुख आदिको अर्जुन-का न चाहना ।

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥

न, काङ्क्षे, विजयम्, कृष्ण, न, च, राज्यम्, सुखानि, च,
किम्, नः, राज्येन, गोविन्द, किम्, भोगैः, जीवितेन, वा ॥३२॥

और—

कृष्ण	=हे कृष्ण (मैं)	(काङ्क्षे)	=चाहता
विजयम्	=विजयको	गोविन्द	=हे गोविन्द
न	=नहीं	नः	=हमें
काङ्क्षे	=चाहता	राज्येन	=राज्यसे
च	=और	किम्	=क्या (प्रयोजन है)
राज्यम्	=राज्य	वा	=अथवा
च	=तथा	भोगैः	=भोगोंसे (और)
सुखानि	=सुखोंको (भी)	जीवितेन	=जीवनसे (भी)
न	=नहीं	किम्	=क्या (प्रयोजन है)

[„] येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥

येषाम्, अर्थे, काङ्क्षितम्, नः, राज्यम्, भोगाः, सुखानि, च,
ते, इमे, अवस्थिताः, युद्धे, प्राणान्, त्यक्त्वा, धनानि, च ॥३३॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्योंकि—

नः =हमें
येषाम् =जिनके
अर्थे =लिये
राज्यम् =राज्य
भोगाः =भोग
च =और
सुखानि =सुखादिक
काङ्क्षितम् =इच्छित हैं
ते =वे (ही)

इमे =यह सब
धनानि =धन
च =और
प्राणान् =जीवन-(की आशा)को
त्यक्त्वा =त्यागकर
युद्धे =युद्धमें
अवस्थिताः =खड़े हैं

अर्जुनका त्रिलोकीके राज्य के लिये भी आचार्यादि स्वजनोंको न मारनेकी इच्छा प्रगट करना।

आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः संबन्धिनस्तथा ॥

आचार्याः, पितरः, पुत्राः, तथा, एव, च, पितामहाः,
मातुलाः, श्वशुराः, पौत्राः, श्यालाः, संबन्धिनः, तथा ॥ ३४ ॥

जो कि—

आचार्याः =गुरुजन
पितरः =ताऊ चाचे
पुत्राः =लड़के
च =और
तथा =वैसे
एव =ही
पितामहाः =दादा

मातुलाः =मामा
श्वशुराः =ससुर
पौत्राः =पोते
श्यालाः =साले
तथा =तथा
(और भी)
संबन्धिनः =सम्बन्धी लोग हैं

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

["] एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५॥

एतान्, न, हन्तुम्, इच्छामि, घ्नतः, अपि, मधुसूदन,
अपि, त्रैलोक्यराज्यस्य, हेतोः, किम्, नु, महीकृते ॥ ३५॥

इसलिये—

मधुसूदन	= हे मधुसूदन (मुझे)	एतान्	= इन सबको
घ्नतः	= मारनेपर	हन्तुम्	= मारना
अपि	= भी (अथवा)	न	= नहीं
त्रैलोक्य-राज्यस्य	= तीन लोकके राज्यके	इच्छामि	= चाहता (फिर)
हेतोः	= लिये	महीकृते	= पृथिवीके लिये (तो)
अपि	= भी (मैं)	नु किम्	= कहना ही क्या है

अर्जुनका अपने आततायी बान्धवोंको भी मारनेमें पाप समझना ।

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६॥

निहत्य, धार्तराष्ट्रान्, नः, का, प्रीतिः, स्यात्, जनार्दन,
पापम्, एव, आश्रयेत्, अस्मान्, हत्वा, एतान्, आततायिनः ॥

जनार्दन	= हे जनार्दन	प्रीतिः	= प्रसन्नता
धार्तराष्ट्रान्	= धृतराष्ट्रके पुत्रोंको	स्यात्	= होगी
निहत्य	= मारकर (भी)	एतान्	= इन
नः	= हमें	आततायिनः	= आततायियोंको
का	= क्या	हत्वा	= मारकर (तो)

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्मान्	=हमें	एव	=ही
पापम्	=पाप	आश्रयेत्	=लगेगा

स्वजनोंको मारनेकी योग्यताका निरूपण।

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३७॥

तस्मात्, न, अर्हाः, वयम्, हन्तुम्, धार्तराष्ट्रान्, स्वबान्धवान्, स्वजनम्, हि, कथम्, हत्वा, सुखिनः, स्याम, माधव ॥३७॥

तस्मात्	=इससे	न अर्हाः	=योग्य नहीं हैं
माधव	=हे माधव	हि	=क्योंकि
स्वबान्धवान्	=अपने बान्धव	स्वजनम्	=अपने कुटुम्बको
धार्तराष्ट्रान्	=धृतराष्ट्रके पुत्रोंको	हत्वा	=मारकर (हम)
		कथम्	=कैसे
हन्तुम्	=मारनेके लिये	सुखिनः	=सुखी
वयम्	=हम	स्याम	=होंगे

लोभके कारण दुर्योधनादि की कुलनाशक कर्ममें प्रवृत्ति देखकर भी अर्जुनका अपने लिये उससे निवृत्त होनेको योग्य समझना।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥३८॥

यद्यपि, एते, न, पश्यन्ति, लोभोपहतचेतसः, कुलक्षयकृतम्, दोषम्, मित्रद्रोहे, च, पातकम् ॥३८॥

यद्यपि	=यद्यपि	एते	=यह लोग
लोभोपहतचेतसः	=लोभसे भ्रष्टचित्त हुए	कुलक्षयकृतम्	=कुलके नाशकृत

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दोषम्	=दोषको	पातकम्	=पापको
च	=और	न	=नहीं
मित्रद्रोहे	={ मित्रोंके साथ विरोध करनेमें	पश्यन्ति	=देखते हैं

["] कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥३९॥

कथम्, न, ज्ञेयम्, अस्माभिः, पापात्, अस्मात्, निवर्तितुम्,
कुलक्षयकृतम्, दोषम्, प्रपश्यद्भिः, जनार्दन ॥३९॥

परन्तु—

जनार्दन	=हे जनार्दन	अस्मात्	=इस
कुलक्षयकृतम्	={ कुलके नाश करनेसे होते हुए	पापात्	=पापसे
		निवर्तितुम्	=हटनेके लिये
		कथम्	=क्यों
दोषम्	=दोषको	न	=नहीं
प्रपश्यद्भिः	=जाननेवाले	ज्ञेयम्	={ विचार करना चाहिये
अस्माभिः	=हमलोगोंको		

कुलके नाशसे धर्मकी हानि और पापकी वृद्धि । कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥४०॥

कुलक्षये, प्रणश्यन्ति, कुलधर्माः, सनातनाः,
धर्मे, नष्टे, कुलम्, कृत्स्नम्, अधर्मः, अभिभवति, उत ॥४०॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्योंकि—

कुलक्षये	= कुलके नाश होनेसे	कृत्स्नम्	= संपूर्ण
सनातनाः	= सनातन	कुलम्	= कुलको
कुलधर्माः	= कुलधर्म	अधर्मः	= पाप
प्रणश्यन्ति	= नष्ट हो जाते हैं	उत	= भी
धर्मे	= धर्मके	अभिभवति	= बहुत दबा लेता है
नष्टे	= नाश होनेसे		

पापकी वृद्धि-से वर्णसंकरताकी उत्पत्ति।

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥४१॥

अधर्माभिभवात्, कृष्ण, प्रदुष्यन्ति, कुलस्त्रियः, स्त्रीषु, दुष्टासु, वार्ष्णेय, जायते, वर्णसंकरः ॥४१॥

तथा—

कृष्ण	= हे कृष्ण		(और)
अधर्माभिभवात्	= पापके अधिक बढ़ जानेसे	वार्ष्णेय	= हे वार्ष्णेय
		स्त्रीषु	= स्त्रियोंके
कुलस्त्रियः	= कुलकी स्त्रियां	दुष्टासु	= दूषित होनेपर
प्रदुष्यन्ति	= दूषित हो जाती हैं	वर्णसंकरः	= वर्णसंकर
		जायते	= उत्पन्न होता है

वर्णसंकरता-से पितरों को नरकको प्राप्ति।

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥४२॥

संकरः, नरकाय, एव, कुलघ्नानाम्, कुलस्य, च, पतन्ति, पितरः, हि, एषाम्, लुप्तपिण्डोदकक्रियाः ॥४२॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

और वह—

संकरः	=वर्णसंकर	लुप्तपिण्डोदकक्रियाः	=लोप हुई पिण्ड और जलकी क्रियावाले
कुलघ्नानाम्	=कुलघातियोंको	एषाम्	=इनके
च	=और	पितरः	=पितरलोग
कुलस्य	=कुलको	हि	=भी
नरकाय	=नरकमें ले जानेके लिये	पतन्ति	=गिर जाते हैं
एव	=ही (होता है)		

वर्णसंकर-कारक दोषोंसे जातिधर्म और कुलधर्मका नाश।

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥४२॥

दोषैः, एतैः, कुलघ्नानाम्, वर्णसंकरकारकैः, उत्साद्यन्ते, जातिधर्माः, कुलधर्माः, च, शाश्वताः ॥४२॥

और—

एतैः	=इन	शाश्वताः	=सनातन
वर्णसंकरकारकैः	=वर्णसंकरकारक	कुलधर्माः	=कुलधर्म
दोषैः	=दोषोंसे	च	=और
कुलघ्नानाम्	=कुलघातियोंके	जातिधर्माः	=जातिधर्म
		उत्साद्यन्ते	=नष्ट हो जाते हैं

कुलधर्मके नाशसे नरककी प्राप्ति।

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ॥४४॥

उत्सन्नकुलधर्माणाम्, मनुष्याणाम्, जनार्दन, नरके, अनियतम्, वासः, भवति, इति, अनुशुश्रुम ॥४४॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तथा—

जनार्दन	=हे जनार्दन	नरके	=नरकमें
उत्सन्नकुलधर्माणाम्	=नष्ट हुए कुलधर्मवाले	वासः	=वास
		भवति	=होता है
मनुष्याणाम्	=मनुष्योंका	इति	=ऐसा (हमने)
अनियतम्	=अनन्त कालतक	अनुशुश्रुम	=सुना है

राज्यके लोभसे स्वजनोंको मारनेमें पाप समझकर अर्जुनका पश्चात्ताप करना।

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

अहो, बत, महत्पापम्, कर्तुम्, व्यवसिताः, वयम्,
यत्, राज्यसुखलोभेन, हन्तुम्, स्वजनम्, उद्यताः ॥४५॥

अहो	=अहो	व्यवसिताः	=तैयार हुए हैं
बत	=शोक है (कि)	यत्	=जो कि
वयम्	=हमलोग (बुद्धिमान् होकर भी)	राज्यसुखलोभेन	=राज्य और सुखके लोभसे
महत्पापम्	=महान् पाप	स्वजनम्	=अपने कुलको
		हन्तुम्	=मारनेके लिये
कर्तुम्	=करनेको	उद्यताः	=उद्यत हुए हैं

बिना सामना किये कौरवोंद्वारा मारा जानेमें अर्जुनका स्व-कल्याण समझना

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

यदि, माम्, अप्रतीकारम्, अशस्त्रम्, शस्त्रपाणयः,
धार्तराष्ट्राः, रणे, हन्युः, तत्, मे, क्षेमतरम्, भवेत् ॥४६॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदि	=यदि	रणे	=रणमें
माम्	=मुझ	हन्युः	=मारें (तो)
अशस्त्रम्	=शस्त्ररहित	तत्	=वह (मारना भी)
अप्रतीकारम्	={ न सामना करनेवालेको	मे	=मेरे लिये
शस्त्रपाणयः	=शस्त्रधारी	क्षेमतरम्	={ अतिकल्याण-कारक
धार्तराष्ट्राः	=धृतराष्ट्रके पुत्र	भवेत्	=होगा

संजय उवाच

शोकयुक्त अर्जुनका धनुष-बाण छोड़कर बैठना ।

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७॥

एवम्, उक्त्वा, अर्जुनः, संख्ये, रथोपस्थे, उपाविशत्,
विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः ॥४७॥

संजय बोला कि—

संख्ये	=रणभूमिमें	सशरम्	=बाणसहित
शोकसंविग्न-मानसः	={ शोकसे उद्विग्न मनवाला	चापम्	=धनुषको
अर्जुनः	=अर्जुन	विसृज्य	=त्यागकर
एवम्	=इस प्रकार	रथोपस्थे	={ रथके पिछले भागमें
उक्त्वा	=कहकर	उपाविशत्	=बैठ गया

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

हरिः ॐ तत्सत् हरिः ॐ तत्सत् हरिः ॐ तत्सत्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

DIgitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ॐ श्रीपरमात्मने नमः

अथ द्वितीयोऽध्यायः

प्रधान विषय—१ से १० तक अर्जुनकी कायरताके विषयमें श्रीकृष्णार्जुनका संवाद। (११–३०) सांख्ययोगका विषय। (३१–३८) क्षात्र-धर्मके अनुसार युद्ध करनेकी आवश्यकताका निरूपण। (३९–५३) निष्काम कर्मयोगका विषय। (५४–७२) स्थिरबुद्धि पुरुषके लक्षण और उसकी महिमा।

संजय उवाच

संजय द्वारा अर्जुनकी कायरताका वर्णन।

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

तम्, तथा, कृपया, आविष्टम्, अश्रुपूर्णाकुलेक्षणम्,
विषीदन्तम्, इदम्, वाक्यम्, उवाच, मधुसूदनः ॥ १ ॥

संजय बोला कि—

तथा	=पूर्वोक्त प्रकारसे	तम्	=उस (अर्जुन) के प्रति
कृपया	=करुणाकरके		
आविष्टम्	=व्याप्त (और)	मधुसूदनः	=भगवान् मधुसूदनने
अश्रुपूर्णा-कुलेक्षणम्	=आंसुओंसे पूर्ण (तथा) व्याकुल नेत्रोंवाले	इदम्	=यह
		वाक्यम्	=वचन
विषीदन्तम्	=शोकयुक्त	उवाच	=कहा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥



Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीभगवानुवाच

अर्जुनके मोहयुक्त करुणा-भावकी निन्दा।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

कुतः, त्वा, कश्मलम्, इदम्, विषमे, समुपस्थितम्, अनार्यजुष्टम्, अस्वर्ग्यम्, अकीर्तिकरम्, अर्जुन ॥ २ ॥

अर्जुन	=हे अर्जुन		(यह)
त्वा	=तुमको (इस)	अनार्यजुष्टम्	=न तो श्रेष्ठ पुरुषोंसे आचरण किया गया है
विषमे	=विषमस्थलमें	अस्वर्ग्यम्	=न स्वर्गको देनेवाला है
इदम्	=यह	अकीर्तिकरम्	=न कीर्तिको करनेवाला है
कश्मलम्	=अज्ञान		
कुतः	=किस हेतुसे		
समुपस्थितम्	=प्राप्त हुआ		
(यतः)	=क्योंकि		

कायरताको त्याग कर युद्ध करनेके लिये अर्जुनके प्रति भगवान् की आज्ञा।

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

क्लैब्यम्, मा, स्म, गमः, पार्थ, न, एतत्, त्वयि, उपपद्यते, क्षुद्रम्, हृदयदौर्बल्यम्, त्यक्त्वा, उत्तिष्ठ, परंतप ॥ ३ ॥

इसलिये—

पार्थ	=हे अर्जुन	मा स्म गमः	=मत प्राप्त हो
क्लैब्यम्	=नपुंसकताको	एतत्	=यह

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वयि	=तेरेमें	हृदय-दौर्बल्यम्	=हृदयकी दुर्बलताको
न उपपद्यते	=योग्य नहीं है	त्यक्त्वा	=त्यागकर
परंतप	=हे परंतप	उत्तिष्ठ	=युद्धके लिये खड़ा हो
क्षुद्रम्	=तुच्छ		

अर्जुन उवाच

अर्जुनका भीष्मादिके साथ युद्ध न करनेकी इच्छा प्रगट करना ।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

कथम्, भीष्मम्, अहम्, संख्ये, द्रोणम्, च, मधुसूदन, इषुभिः, प्रति, योत्स्यामि, पूजार्हौ, अरिसूदन ॥ ४ ॥

तब अर्जुन बोला कि—

मधुसूदन	=हे मधुसूदन	कथम्	=किस प्रकार
अहम्	=मैं	इषुभिः	=बाणोंकरके
संख्ये	=रणभूमिमें	योत्स्यामि	=युद्ध करूंगा
भीष्मम्	=भीष्मपितामह	(यतः)	=क्योंकि
च	=और	अरिसूदन	=हे अरिसूदन
द्रोणम्	=द्रोणाचार्यके	(तौ)	=वे दोनों (ही)
प्रति	=प्रति	पूजार्हौ	=पूजनीय हैं

अर्जुनका गुरुजनों को मारनेकी अपेक्षा भीख मांगकर खानेको श्रेष्ठ समझना ।

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५ ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुरून्, अहत्वा, हि, महानुभावान्, श्रेयः, भोक्तुम्, भैक्ष्यम्, अपि, इह, लोके, हत्वा, अर्थकामान्, तु, गुरून्, इह, एव, भुञ्जीय, भोगान्, रुधिरप्रदिग्धान् ॥ ५ ॥

इसलिये इन—

महानुभावान्	=महानुभाव
गुरून्	=गुरुजनोंको
अहत्वा	=न मारकर
इह	=इस
लोके	=लोकमें
भैक्ष्यम्	=भिक्षाका अन्न
अपि	=भी
भोक्तुम्	=भोगना
श्रेयः	=कल्याणकारक (समझता हूं)
हि	=क्योंकि
गुरून्	=गुरुजनोंको
हत्वा	=मारकर
(अपि)	=भी
इह	=इस लोकमें
रुधिरप्रदिग्धान्	=रुधिरसे सने हुए
अर्थकामान्	=अर्थ और कामरूप
भोगान्	=भोगोंको
एव	=ही
तु	=तो
भुञ्जीय	=भोगूंगा

अपने कर्तव्यके विषयमें अर्जुनको संशय होना।

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न, च, एतत्, विद्मः, कतरत्, नः, गरीयः, यद्वा, जयेम,
यदि, वा, नः, जयेयुः, यान्, एव, हत्वा, न, जिजीविषामः,
ते, अवस्थिताः, प्रमुखे, धार्तराष्ट्राः ॥ ६ ॥

और हमलोग

एतत्	=यह	जयेयुः	=वे जीतेंगे (और)
च	=भी	यान्	=जिनको
न	=नहीं	हत्वा	=मारकर (हम)
विद्मः	=जानते (कि)	न जिजीविषामः	=जीना भी नहीं चाहते
नः	=हमारे लिये	ते	=वे
कतरत्	=क्या (करना)	एव	=ही
गरीयः	=श्रेष्ठ है	धार्तराष्ट्राः	=धृतराष्ट्रके पुत्र
यद्वा	=अथवा (यह भी नहीं जानते कि)	प्रमुखे	=हमारे सामने
जयेम	=हम जीतेंगे	अवस्थिताः	=खड़े हैं
यदि वा	=या		
नः	=हमको		

अर्जुन का भगवान्‌के शरण होकर स्वकर्तव्य पूछना ।

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कार्पण्यदोषोपहतस्वभावः, पृच्छामि, त्वाम्, धर्मसंमूढचेताः, यत्, श्रेयः, स्यात्, निश्चितम्, ब्रूहि, तत्, मे, शिष्यः, ते, अहम्, शाधि, माम्, त्वाम्, प्रपन्नम् ॥ ७ ॥

इसलिये—

कार्पण्य-दोषोपहत-स्वभावः	= कायरतारूप दोष करके उपहत हुए स्वभाववाला	श्रेयः	= कल्याणकारक साधन
		स्यात्	= हो
		तत्	= वह
	(और)	मे	= मेरे लिये
धर्म-संमूढचेताः	= धर्मके विषयमें मोहितचित्त हुआ (मैं)	ब्रूहि	= कहिये (क्योंकि)
		अहम्	= मैं
		ते	= आपका
त्वाम्	= आपको	शिष्यः	= शिष्य हूं (इसलिये)
पृच्छामि	= पूछता हूं	त्वाम्	= आपके
यत्	= जो (कुछ)	प्रपन्नम्	= शरण हुए
निश्चितम्	= निश्चय किया हुआ	माम्	= मेरेको
		शाधि	= शिक्षा दीजिये

अर्जुनका त्रिलोकीके राज्य-से भी शोककी निवृत्ति न मानना ।

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न, हि, प्रपश्यामि, मम, अपनुद्यात्, यत्, शोकम्, उच्छोषणम्, इन्द्रियाणाम्, अवाप्य, भूमौ, असपत्नम्, ऋद्धम्, राज्यम्, सुराणाम्, अपि, च, आधिपत्यम् ॥ ८ ॥

हि	=क्योंकि	(तत्)	=उस (उपाय) को
भूमौ	=भूमिमें	न	=नहीं
असपत्नम्	=निष्कण्टक	प्रपश्यामि	=देखता हूं
ऋद्धम्	=धनधान्यसंपन्न	यत्	=जो कि
राज्यम्	=राज्यको	मम	=मेरी
च	=और	इन्द्रियाणाम्	=इन्द्रियोंके
सुराणाम्	=देवताओंके	उच्छोषणम्	=सुखानेवाले
आधिपत्यम्	=स्वामीपनेको	शोकम्	=शोकको
अवाप्य	=प्राप्त होकर	अपनुद्यात्	=दूर कर सके
अपि	=भी (मैं)		

संजय उवाच

अर्जुनका युद्धसे उपराम होना। एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥ ९ ॥

एवम्, उक्त्वा, हृषीकेशम्, गुडाकेशः, परंतप, न, योत्स्ये, इति, गोविन्दम्, उक्त्वा, तूष्णीम्, बभूव, ह ॥ ९ ॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संजय बोला—

परंतप	= हे राजन्	गोविन्दम्	= श्रीगोविन्द भगवान्‌को
गुडाकेशः	= निद्राको जीतनेवाला अर्जुन	न योत्स्ये	= युद्ध नहीं करूंगा
हृषीकेशम्	= अन्तर्यामी श्रीकृष्ण महाराजके प्रति	इति	= ऐसे
		ह	= स्पष्ट
		उक्त्वा	= कहकर
एवम्	= इस प्रकार	तूष्णीम्	= चुप
उक्त्वा	= कहकर (फिर)	बभूव	= हो गया

अर्जुनकी अज्ञानता पर भगवान् का मुस्कुराना।

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

तम्, उवाच, हृषीकेशः, प्रहसन्, इव, भारत,
सेनयोः, उभयोः, मध्ये, विषीदन्तम्, इदम्, वचः ॥१०॥

उसके उपरान्त—

भारत	= हे भरतवंशी धृतराष्ट्र	तम्	= उस
		विषीदन्तम्	= शोकयुक्त अर्जुनको
हृषीकेशः	= अन्तर्यामी श्रीकृष्ण महाराजने	प्रहसन् इव	= हंसते हुए-से
उभयोः	= दोनों	इदम्	= यह
सेनयोः	= सेनाओंके	वचः	= वचन
मध्ये	= बीचमें	उवाच	= कहा

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीभगवानुवाच

शोक करनेको अयोग्य बताते हुए भगवान्‌का अर्जुनके प्रति उपदेश आरम्भ करना ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥११॥

अशोच्यान्, अन्वशोचः, त्वम्, प्रज्ञावादान्, च, भाषसे,
गतासून्, अगतासून्, च, न, अनुशोचन्ति, पण्डिताः ॥११॥

हे अर्जुन—

त्वम्	=तूं	गतासून्	=जिनके प्राण चले गये हैं उनके लिये
अशोच्यान्	=न शोक करने योग्योंके लिये	च	=और
अन्वशोचः	=शोक करता है	अगतासून्	=जिनके प्राण नहीं गये हैं उनके लिये (भी)
च	=और	न	=नहीं
प्रज्ञावादान्	=पण्डितोंके (से) वचनोंको	अनुशोचन्ति	=शोक करते हैं
भाषसे	=कहता है (परन्तु)		
पण्डिताः	=पण्डितजन		

आत्माकी नित्यता का निरूपण ।

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥१२॥

न, तु, एव, अहम्, जातु, न, आसम्, न, त्वम्, न, इमे,
जनाधिपाः, न, च, एव, न, भविष्यामः, सर्वे, वयम्, अतः, परम् ॥

क्योंकि आत्मा नित्य है इसलिये शोक करना अयुक्त है । वास्तवमें—

न	=न	(एवम्)	=ऐसा
तु	=तो	एव	=ही (है कि)

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अहम्	=मैं	(आसन्)	=थे
जातु	=किसी कालमें	च	=और
न	=नहीं	न	=न
आसम्	=था (अथवा)	(एवम्)	=ऐसा
त्वम्	=तूं	एव	=ही (है कि)
न	=नहीं	अतः	=इससे
(आसीः)	=था (अथवा)	परम्	=आगे
इमे	=यह	वयम्	=हम
जनाधिपाः	=राजालोग	सर्वे	=सब
न	=नहीं	न	=नहीं
		भविष्यामः	=रहेंगे

आत्माकी नित्यता का निरूपण और धीर पुरुषकी प्रशंसा।

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥

देहिनः, अस्मिन्, यथा, देहे, कौमारम्, यौवनम्, जरा, तथा, देहान्तरप्राप्तिः, धीरः, तत्र, न, मुह्यति ॥१३॥

किन्तु—

यथा	=जैसे	जरा	=वृद्ध अवस्था (होती है)
देहिनः	=जीवात्माकी		
अस्मिन्	=इस	तथा	=वैसे ही
देहे	=देहमें	देहान्तर-प्राप्तिः	=अन्य शरीरकी प्राप्ति होती है
कौमारम्	=कुमार		
यौवनम्	=युवा (और)	तत्र	=उस विषयमें

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धीरः	=धीर पुरुष	न	=नहीं
		मुह्यति	=मोहित होता है

अर्थात् जैसे कुमार, युवा और जरा अवस्थारूप स्थूल शरीरका विकार अज्ञानसे आत्मामें भासता है वैसे ही एक शरीरसे दूसरे शरीरको प्राप्त होनारूप सूक्ष्म शरीरका विकार भी अज्ञानसे ही आत्मामें भासता है इसलिये तत्त्वको जाननेवाला धीर पुरुष इस विषयमें नहीं मोहित होता ।

इन्द्रिय और विषयोंके संयोगकी अनित्यताका निरूपण और उनको सहन करनेके लिये आज्ञा ।

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥

मात्रास्पर्शाः, तु, कौन्तेय, शीतोष्णसुखदुःखदाः,
आगमापायिनः, अनित्याः, तान्, तितिक्षस्व, भारत ॥१४॥

कौन्तेय	=हे कुन्तीपुत्र	आगमापायिनः	= क्षणभङ्गुर (और)
शीतोष्णसुखदुःखदाः	=सर्दी गर्मी और सुख दुःखको देनेवाले	अनित्याः	=अनित्य हैं (इसलिये)
मात्रास्पर्शाः	=इन्द्रिय और विषयोंके संयोग	भारत	=हे भरतवंशी अर्जुन
		तान्	=उनको (तूं)
तु	=तो	तितिक्षस्व	=सहन कर

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तितिक्षाका फल यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

यम्, हि, न, व्यथयन्ति, एते, पुरुषम्, पुरुषर्षभ,
समदुःखसुखम्, धीरम्, सः, अमृतत्वाय, कल्पते ॥१५॥

हि	=क्योंकि	एते	=यह (इन्द्रियोंके विषय)
पुरुषर्षभ	=हे पुरुषश्रेष्ठ		
समदुःखसुखम्	=दुःखसुखको समान समझनेवाले	न व्यथयन्ति	=व्याकुल नहीं कर सकते
		सः	=वह
यम्	=जिस	अमृतत्वाय	=मोक्षके लिये
धीरम्	=धीर		
पुरुषम्	=पुरुषको	कल्पते	=योग्य होता है

सत् असत्का निर्णय नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

न, असतः, विद्यते, भावः, न, अभावः, विद्यते, सतः,
उभयोः, अपि, दृष्टः, अन्तः, तु, अनयोः, तत्त्वदर्शिभिः ॥१६॥

और हे अर्जुन—

असतः	=असत् (वस्तु) का तो	तु	=और
		सतः	=सत्का
भावः	=अस्तित्व	अभावः	=अभाव
न	=नहीं	न	=नहीं
विद्यते	=है	विद्यते	=है

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

	(इस प्रकार)	अन्तः	=तत्त्व
अनयोः	=इन	तत्त्वदर्शिभिः	=ज्ञानी पुरुषोंद्वारा
उभयोः	=दोनोंका		
अपि	=ही	दृष्टः	=देखा गया है

सत् और असत्के स्वरूपका कथन।

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥

अविनाशि, तु, तत्, विद्धि, येन, सर्वम्, इदम्, ततम्,
विनाशम्, अव्ययस्य, अस्य, न, कश्चित्, कर्तुम्, अर्हति ॥१७॥

इस न्यायके अनुसार—

अविनाशि	=नाशरहित	ततम्	=व्याप्त है
तु	=तो		(क्योंकि)
तत्	=उसको	अस्य	=इस
विद्धि	=जान (कि)	अव्ययस्य	=अविनाशीका
येन	=जिससे	विनाशम्	=विनाश
इदम्	=यह	कर्तुम्	=करनेको
सर्वम्	=संपूर्ण	कश्चित्	=कोई भी
	(जगत्)	न अर्हति	=समर्थ नहीं है

[„] **अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।**
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥

अन्तवन्तः, इमे, देहाः, नित्यस्य, उक्ताः, शरीरिणः,
अनाशिनः, अप्रमेयस्य, तस्मात्, युध्यस्व, भारत ॥१८॥

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

और इस—
